किट्ट इति यः प्रसिद्धः कर्क० 'अथैतत्त्रयं पिष्टं भवति शर्कराश्मायोरसस्तेन संसृजति" श० ब्रा० ।

**अयोहृदय** त्रि० अय इव कठिनं हृदयमस्य । कठिनचित्ते दयाशून्यचित्ते । "सुहृदयोहृदयः प्रतिगतर्जतां रघुः ।

**अय्मन्** त्रि० अय—मनिन् । १गन्तरि २गमनसाधने च "समानमय्मन् पर्य्येति जागृविः" ता०ब्रा० "अय्मन् अय्मनि गमनसाधने रथे उपविष्टः" भा० ।

**अर** पु० इयर्त्ति गच्छत्यनेन ऋ—अच् । १चक्रस्य २नाभिनेम्योर्मध्यस्थे काष्ठे ३शीघ्रे च ४शीघ्रतादिगुणवति त्रि० । "गण्डोज्ज्वलामुज्ज्वलनाभिचक्रया विराजमानां नवयोदरश्रियां" माघः उदरा उन्नता अरास्चक्रशलाका इति मल्लि० "विभुरराम नेमिः परिभूरजायथाः ऋ०१ १४,६ "अरा इव रथनाभावित्ति" श्रुतिः "सम्यञ्चोऽग्निं स पर्यतारा नाभिमिवाभितः" अथ० ३,३०,६, "अरा इवाग्ने नेमिरिति" शत०ब्रा०। एवमस्य पुंस्त्वेव प्रयोगात् "रोपधः" ६।७ पृष्ठे दर्शितात् पा० सूत्राच्च पुंस्त्वे स्थिते मेदिनीकरोक्तं क्लीवत्वं शीघ्रतायामेवान्वितं न तु चक्राङ्गेऽपि । "यदपि च तच्चक्रं द्वादशारं यद्वै कुमाराः परिवर्त्तयन्ति तेऽपि षड्तवः संवत्सरश्चक्रम्" भा०आ०प० । द्वादश मासा अराइव यस्य तदर्थः । "पञ्चारे चक्रे परिवर्त्तमामे तस्मिन्नातस्थुर्भुवनानि च विश्वा" ऋ०१,१६४,१३ पञ्चारे पञ्चर्त्तुरूपैररैर्युक्ते हेमन्तशिशिरयोरेकत्वाभिप्रायेण पञ्चर्त्तुता" भा० ४कोणे "त्रिपञ्चारे पीठे शवशिवहृदीति" श्यामास्तवः । संज्ञायां कन् । ५शैवाले "प्रापडोति" ख्याते ६पर्पटे च पु०।

**अरक्षस्** त्रि० नास्ति रक्षो रक्षस्तुल्यं बाधकं यस्य । "बाधकरहिते । "जिघर्म्यरक्षसा मनसा च तज्जुषेत" ऋ०२,१०,५ । "अरक्षसा बाधकरहितेन मनसा" भा० ।

**अरक्षित** त्रि० न रक्षितः । रक्षितभिन्ने । "पादं स्वामिन्यरक्षिते" स्मृतिः।

**अरगवध** पु०ष्ट० हस्वः । आरगवधवृक्षे (शुं धालो) ।

**अरघट्ट** पु० अरं शीघ्रं घट्टते चाल्यतेऽसौ । १महाकूपे, २कूपोपरिनिबद्धजलोत्तोलनकाष्ठे च । "अथ कूपमासाद्यारघट्टघाटिकामार्गेण सर्पस्तेनानीतः" । "तदाकर्ण्य तु अरघट्टघाटिकामार्गमहमाश्रित्येति" च पञ्चत० स्वार्थे कन् ।तत्रैव ।

**अरङ्कृत्** त्रि० अलं करोति अलम्+कृ—क्विप् लस्य रः । १अलङ्कारिणि "त्वमग्ने ! द्रविणोदा अरङ्कृते" ऋ० २,१,६,० "अरङ्कृते अलङ्कुर्वते" भा० हविष्मन्तो अरङ्कृतः ऋ०१,१४,५, भा० अलङ्कृतःअलङ्कुर्वतः "कपिलकादीनां संज्ञाछन्दसोः"लस्य रः भा०। २पर्य्याप्तकारिणि च "उरुधारामरङ्कृतम् ऋ० ८,१,१०, "अरङ्कृतं पर्य्याप्तकारिणमिन्द्रम्" भा० ।

**अरङ्कृत** त्रि० अलं क्रियते स्म अलम्+कृ+क्त लो रः । अलङ्कृते भूषिते "यमोह यज्ञो गच्छत्यग्निदूतो अरङ्कृतः" ऋ०१०,१४,१३, अरङ्कृतः बहुभिर्द्रव्यैरलङ्काररूपैर्युक्तः" भा० ।

**अरङ्कृति** स्त्री अलम्+कृ+क्तिन् लस्य रः। अलङ्कारे भूषायाम् "का ते अस्त्यरङ्कृतिः सूक्तैः" ऋ०७,२९,३ । "अरङ्कृतिरलङ्कृतिः" भा० ।

**अरङ्गम** पु० अलं पर्य्याप्तं गमोगतिः लस्य रः । पर्य्याप्तगमने "अरङ्गमाय जग्मयेऽपश्चाद्दघ्वने नरे" ऋ०६,४२,१, "अरङ्गमाय पर्य्याप्तगमनाय" भा० ।

**अरजस्** त्रि० रनञ्ज असुन् नलोपः न०ब० । १रजोगुणकार्य्यकामक्रोधादिशून्ये । "अजरममरमभयमस्रुतमरज" इति शत०ब्रा० वा कप् । अरजस्कोऽयम् ।२अनार्त्तवायां नग्निकायां स्त्री । भृशा० अभूततद्भावे क्यङ् सलोपश्च, अरजायते ।

**अरज्जु** न० नास्ति रज्जुर्बन्धनसाधनं यत्र । ३बन्धनागारे रज्जुहीनत्वेऽपि बन्धनहेतुत्वात् तथात्वम् । "अरज्जौ दस्यूनुत्समुनव्धीतये" ऋ०२,१३,९, "अरज्जौ बन्धनागारे" भा०२रज्जुरहिते रोगादौ च "सेतृभिः रज्जुभिः सिनीथः, ७,८४,२, रज्जुरहितैः रोगादिभिः भा० ।

**अरटु(लु)** पु० अरं शीघ्रमटति अट—अल वा उन् शक० । (शोना) वृक्षे इति ख्याते कृष्यादि० क । डलयोरैक्यात् अरडुकः तद्भवे त्रि० ।

**अरट्व** पु० न रटति रट—वन् न०त० । पृथुश्रवोन्द्रपतिमन्त्रिभेदे "अरट्वे अक्षे नहुषे सुकृत्वनि" सुकृत्तराय सुकृतः" ऋ० ८,४५,१७ अरट्वे अक्षे नहुषे सुकृत्वनि च एते तस्य राज्ञोऽध्यक्षाः" भा० ।

**अरण** त्रि० नास्ति रणं युद्धं यस्य । १युद्धशून्ये "अरणं मरणं समयात् समयात्" भट्टिः नास्ति रणः शब्दो येन । वाक्सङ्गरहिते २रिपौ "ब्रह्मराजन्याभ्यां शूद्राय चार्य्याय स्वाय चारणाय" यजु० १६,२, "अरणाय पराय वाक्सङ्गरहिताय शत्रवे" वेददी०। ३अरमसाणे पु०साधुः। "योनः स्वो अरणो यश्च निष्ठ्यो जिघांसति" ऋ०६,